तंनवदेद्दयेतत्वेनेनपराग्वाएतद्रिक्तमक्षरंयदेतदोमितितद्यत्किंचो
मित्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिच्यादात्मानंसकामे
भ्योनालंस्यादथैतत्पूर्णमभ्यात्मंयन्नेतिसयत्सर्वंनेतिब्रूयात्पापिका
स्यकीर्त्तिर्जायेतसैनंतत्रैवहन्यात्तस्मात्कालएवदद्यात्कालेनदद्यात्त
त्सत्यानृतेमिथुनीकरोतितयोर्मिथुनात्प्रजायतेभूयान् भवति
योवैतांवाचंवेदयस्याएषविकारःससंप्रतिविदकारोवैसर्वावा

Indira Gandhi National Centre for the Arts

॥आरण्य०॥ केषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति तस्यै यदुपां
॥४०॥ शु स प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तिर इव तिर इव ह्यशरीर
मशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरं ॥१८
॥६॥४०॥ तद्वाइदं बृहतीसहस्रं संपन्नं तद्यशः स इंद्रः स भूतानाम
मे ५ धिपतिः स य एवं तमिंद्रं भूतानामधिपतिं वेद विस्रसा हैवास्माल्लो
कात्प्रैतीति ह स्माह महिदास ऐतरेयः प्रेत्येंद्रो भूत्वैषु लोकेषु राज
ति तदाहुर्यदनेन रूपेणामुं लोकमभिसंभवती३ अथ केन रूपेणे ॥४०॥

मं लोकमाभवती३ इति यद्वा देतत्स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्त
स्मान्न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मा
त्तस्मान्न बीभत्सेत सोयमात्मेममात्मानममुष्मा आत्मने संप्रयच्छ
मे ६ त्यसावात्मामुमात्मानमिमस्मा आत्मने संप्रयच्छति तावन्योन्यम
भिसंभवतोऽनेन ह रूपेणामुं लोकमभिसंभवत्यमुनो रूपेणेमं लोक
माभवति ॥७॥१९॥४१॥ तत्रैते श्लोकाः यदक्षरं पंचविधं समेति यु
जो युक्ता अभि यत्संवहंति सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः

Indira Gandhi National Centre for the Arts

सर्वएकं भवंति॥ यदक्षरादक्षरमेति युक्तं युञ्जो युक्ता अग्नियत्संवहंति॥
।सत्यस्य सत्यमनु यत्र युज्यंते तत्र देवाः सर्वएकं भवंति। यद्वाच ओ
मिति यच्चनेति यच्चास्याः क्रूरं यद्दु चोल्बणि स्तु। तद्द्वियूया कुर्वयो अ
न्चविंदन्नामायन्नासमतृप्यं छुतेधि। यस्मिन्नामा समतृप्यं छुतेधित
त्रदेवाः सर्वयुजो भवंति। तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्ये
ति विद्वान्। नैनं वाचास्त्रियं ब्रुवन्नैनमस्त्री पुमान्ब्रुवेन। पुमांसं न ब्रुव
न्नेनं वदन्वदति कश्चन। अः इति ब्रह्म तत्रागतमहमिति न द्वाइदं बृ



हती सहस्रसंपन्नं तस्य वा एतस्य बृहती सहस्रस्य संपन्नस्य षट्त्रिंशत
मक्षराणां सहस्राणि भवंति। तावंति पुरुषायुषोह्नां सहस्राणि भवंति जी
वाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्षरमित्यनकाममारोधदेव
रथं तस्य वाग्धुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता तदयं प्रा
णोधितिष्ठति तद्दुक्तमृषिणा तेनेयात्तं मनसो जवीयसा निमिषश्चिज्ज
वीयसेति जवीयसेति॥८॥२०॥४२॥ इति द्वितीयारण्यके तृतीयोध्यायः
॥ राम ॐ नमः॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स

Indira Gandhi National Centre for the Arts

आरण० ॥ ईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजतांभोमरीचीर्मरमापोदोंऽ
॥४२॥ भःपरेणदिवंद्यौःप्रतिष्ठांतरिक्षं मरीचयःपृथिवीमरोयाअधस्तात्ता
आपःसईक्षतेमेनुलोकालोकपालान्नुसृजाइतिसोऽद्भ्यएवपुरुषंसमुद्धृ
त्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यतयथांडंमुखाद्वा
ग्वाचोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणःप्राणाद्वायुरक्षिणीनि
रभिद्येतामक्षीभ्यांचक्षुश्चक्षुषआदित्यःकर्णौनिरभिद्येतांकर्णाभ्यां
श्रोत्रंश्रोत्राद्दिशस्त्वङ्निरभिद्यतत्वचोलोमानिलोमभ्यओषधिवनस्प ॥४२॥

तयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्या
अपानोऽपानान्मृत्युःशिश्नंनिरभिद्यतशिश्नाद्रेतोरेतसआपः॥१॥स्व ४३॥
ताएतादेवताः सृष्टाअस्मिन्महत्यर्णवेप्रापतंस्तमशनापिपासाभ्या
मन्ववार्जत्ताएनमब्रुवन्नायतन नः प्रजानीहियस्मिन्प्रतिष्ठिताअन्नम
दामेति ताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमितिताभ्योऽश्वमा
नयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुवन्सु
कृतंबतेतिपुरुषोवावसुकृतंताअब्रवीद्यथायतनंप्रविशतेत्यग्नि

Indira Gandhi National Centre for the Arts

आरण्य० ॥४३॥

वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षु
र्भूत्वाक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयोलो
मानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानो
भूत्वानाभिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रू
तामावाभ्यामभिप्रजानीहीतितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्ये
तासुभागिन्यौकरोमीतितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभा
गिन्यावेवास्यामशनापिपासेभवतः॥२॥२२॥४४॥सईक्षतेमेनुलोका ॥४३॥

श्चलोकपालाश्चान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्योमूर्त्ति
रजायतयावैसामूर्त्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराङत्यजिघांसत्तद्वा
चाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्यहै
वान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैनत्प्रा
णेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्च
क्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजि
घृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वाहैवा

Indira Gandhi National
Centre for the Arts

आरण० नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहै
॥५४॥ ष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुं
सयद्धैनन्मनसाग्रहैष्यद्ध्यात्वाहैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्ना
शक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्यहैवान्नमत्रप्स्य
त्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषयद्वा
युःसईक्षतकथन्विदंमदृतेस्यादितिसईक्षतकतरेणप्रपद्याइतिस
ईक्षतयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषादृष्टंय ॥५४॥

दिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितं
यदिशिश्नेनविसृष्टमथकोहमितिसएतमेवसीमानंविदार्यैतयाद्वाराप्रा
पद्यतसैषाविदृतिर्नामद्वास्तदेतन्नान्दनंतस्यत्रयआवसथास्त्रयस्वप्ना
अयमावसथोयमावसथोयमावसथइतिसजातोभूतान्यभिव्यैख्यत्
किमिहान्यंवावदिषदितिसएतमेवपुरुषंब्रह्मततममपश्यदिदम
दर्शमिती३तस्मादिदन्द्रोनामेदन्द्रोहवैनामतमिदन्द्रंसन्तमिन्द्रइत्या
चक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाःपरोक्षप्रियाइवहिदेवाः॥३॥

Indira Gandhi National Centre for the Arts

×॥अपक्रामंतुगर्भिण्यः१॥

आरण्०॥ २३॥४५॥इतिद्वितीयारण्यकेचतुर्थोध्यायः॥ॐपुरुषेहवाअयमादितो
॥४५॥ गर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजःसंभूतमात्मन्येवात्मानंबि
भर्तितद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंजन्मतत्स्त्रियाआ
त्मभूयंगच्छतियथास्वमंगंतथातस्मादेनांनहिनस्तिसास्यैतमात्मानम
त्रगतंभावयतिसाभावयित्रीभावयितव्याभवतितंस्त्रीगर्भंबिभर्तिसो
ग्रएवकुमारंजन्मनोग्रेधिभावयतिसयकुमारंजन्मनोग्रेधिभावयत्या
त्मानमेवतद्भावयत्येषांलोकानांसंतत्याएवंसंताहीमेलोकास्तदस्यद्वि ॥४५॥

तीयंजन्मसोस्यायमात्मापुण्येभ्यःकर्मभ्यःप्रतिधीयतेथास्यायमितर
आत्माकृतकृत्योवयोगतःप्रैतिसइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयं
जन्मतदुक्तमृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमानिविश्वा
शतंमापुरआयसीररक्षन्नधःश्येनोजवसानिरदीयमितिगर्भएवैत
च्छयानोवामदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्या
मुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवत्॥१॥२४॥
४६॥इतिद्वितीयारण्यकेपंचमोध्यायः॥ॐ॥कोयमात्मेतिवय

॥यथास्थानंगर्भिण्यः॥२॥

Indira Gandhi National Centre for the Arts

मुपास्महेकतरःसआत्मायेनवापश्यतियेनवाशृणोतियेनवागंधानाजि
घ्रतियेनवावाचंव्याकरोतियेनवास्वादुचास्वादुचविजानातियदेतद्धृद
यंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषा
जूतिःस्मृतिःसंकल्पःक्रतुरसुःकामोवशइतिसर्वाण्येवैतानिप्रज्ञानस्य
नामधेयानिभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपं
चमहाभूतानिपृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानिचक्षु
द्रमिश्राणीवबीजानीतराणिचेतराणिचांडजानिचजारुजानिचस्वेद 

जानिचोद्भिज्जानिचाश्वागावःपुरुषाहस्तिनोयत्किंचेदंप्राणिजंगमं
चपतत्रिचयच्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकः
प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मसएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मि
न्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवत्॥१॥२५॥७॥
इतिद्वितीयारण्यकेषष्ठोध्यायः॥रामॐ॥वाङ्मेमनसिप्रतिष्ठिता
मनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यमआणीस्थःश्रुतंमेमा
प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्या

Indira Gandhi National Centre for the Arts

॥ आरण्य० ॥ ॥ ४१ ॥ मितन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारं ॥ १ ॥ २६ ॥
४८ ॥ इति द्वितीयारण्यके सप्तमोध्यायः ॥ द्वितीयारण्यः समाप्तः ॥ राम ॥
ॐ ॥ अथातः संहिताया उपनिषत् पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः
संहितेति मांडूकेय आकाशः संहितेत्यस्य माक्षव्यो वेदयांचक्रे सहा
विपरिहितो मिनेन मस्य पुत्रेण समगादिति समानेवैतत्परिहितौ मेन
इत्यागस्त्यः समानं ह्येतद्भवति वायुश्चाकाशश्चेत्यधिदैवतमथाध्या राम
त्मं वाक् पूर्वरूपं मन उत्तररूपं प्राणः संहितेति शूरवीरो मांडूकेयोथ ॥ ४१ ॥

हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे संकल्प
यत्यथ वाचा व्याहरति तस्मान्मन एव पूर्वरूपं वागु त्तररूपं प्राणस्त्वे
व संहितेति समानमेनयोरत्र पितुश्च पुत्रस्य च स एषाश्वरथः प्रष्टि
वाहनौ मनो वाक् प्राणसंहतः स य एवमेतां संहितां वेद संधीयते प्रज
या पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु मांडू
केयानां ॥ १ ॥ ४९ ॥ अथ शाकल्यस्य पृथिवी रूपं द्यौरुत्तररूपं वृष्टिः सं
धिः पर्जन्यः संधाता तानदुनापि यत्रैतद्बलवद्वर्षन् [illegible] सं दधदहोरा

पूर्व २

Indira Gandhi National Centre for the Arts

॥आरण०॥ त्रेवर्षतिद्यावापृथिव्योसमधातामित्युताप्याहुरितीन्वधिदैवतमथा
॥४९॥ ध्यात्मंपुरुषोहवाअयंसर्वआदर्शइवविभेनवैइत्याहुस्तस्यदमेवपृथिव्या
रूपमिदंदिवस्तत्रायमंतरेणाकाशोयथासोद्यावापृथिव्यावंतरेणाका
शस्तस्मिन्हस्मिन्नाकाशेप्राणआयत्तोयथामुष्मिन्नाकाशेवायुराय
त्तोयथामूनित्रीणिज्योतींष्येवमिमानिपुरुषेत्रीणिज्योतींषि
यथासौदिव्यादित्यएवमिदंशिरसिचक्षुर्यथासावंतरिक्षेविद्यु
देवमिदमात्मनिहृदयंयथायमग्निःपृथिव्यामिदमुपस्थेरेतएव ॥४९॥
मेव

मुहस्मसर्वलोकमात्मानमनुविधायाहेदमेवपृथिव्यारूपमिदंदिवःस
यएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्व
र्गेणलोकेनसर्वमायुरेति॥२॥५०॥अथातोनिर्भुजप्रवादाःपृथिव्या
ण्णे४ यतनंनिर्भुजंदिव्यायतनंप्रतृण्णमंतरिक्षायतनमुभयमंतरेणाथय
द्येनंनिर्भुजंब्रुवंतमुपवदेद्व्योष्ठावराभ्यांस्थानाभ्यामित्येनंब्रूयाद
थयद्येनंप्रतृण्णंब्रुवंतमुपवदेद्व्योष्ठाउत्तराभ्यांस्थानाभ्यामित्येनं
ब्रूयाद्यस्त्वेवोभयमंतरेणाहतस्यनास्त्युपवादोयद्धिसंधिंविवर्तयति

॥आरण्० ॥४९॥ तन्निर्भुजस्यरूपमथयच्छुद्धे अक्षरे अभिव्याहरतितित्प्रतृण्णस्याग्र उ एवो
भयमंतरेणोभयंव्याप्तंभवतियन्नाद्यकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्ण ण्ण
मुभयकाम उभयमंतरेणाथयद्येनंनिर्भुजंब्रुवंतंपरउपवदेत्पृथिवींदेवता
मारः पृथिवीत्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवंतंपरउप ण्ण
वदेद्दिवंदेवतामारोद्द्यौस्त्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनमुभयम
तरेणब्रुवंतंपरउपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादेवतारिष्यतीत्येनं
ब्रूयाद्यथातुकथाचेब्रुवन्तंब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नवे ॥४९॥

वान्यत्कुशलाद्ब्राह्मणंब्रूयादितिद्युम्न एवब्राह्मणंब्रूयान्नातिद्युम्नेचन
ब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्य इतिहस्माहशूरवीरोमाण्डूकेयः ॥२॥
५॥ अथातोनुव्याहाराः प्राणोवंश इतिविद्यात्सयएनंप्राणंवंशमुप
वदेच्छक्नुवंचेन्मन्येतप्राणंवंशंसमधाः प्राणंमावंशंसंदधतंनशक्नोषी
त्याह प्राणस्त्वावंशोहास्यतीत्येनंब्रूयादथचेदशक्नुवंतंमन्येतप्राणं
वंशंसमधित्सिषंतंनाशकः संधातुंप्राणस्त्वावंशोहास्यतीत्येनंब्रूया
द्यथातुकथाचेब्रुवन्तंब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नवे

Indira Gandhi National Centre for the Arts

२०१०९



वान्यत्कुशलाद्ब्राह्मणं ब्रूयादिति द्युम्न एव ब्राह्मणं ब्रूयान्नातिद्युम्ने च
न ब्राह्मणं ब्रूयान्नमो अस्मै ब्राह्मणेभ्य इति ह स्माह शूरवीरो मांडूकेयः॥
४॥५॥ अथ खल्वाह निर्भुजवक्त्राः पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं
योवकाशः पूर्वरूपोत्तररूपे अंतरेण सा संहितेति स य एवमेतां संहि
तां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन
सर्वमायुरेत्यथ वयं ब्रूमो निर्भुजवक्त्रा इति ह स्माह ह्रस्वो मांडूकेयः
पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योवकाशः पूर्वरूपोत्तररू ॥५०॥

पे अंतरेण येन संधिं विवर्त्तयति येन स्वरात्स्वरं विजानाति येन मा
त्रामात्रां विभजति सा संहितेति स य एवमेतां संहितां वेद संधीयते
प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्य
थ हास्य पुत्र आह मध्यमः प्रातीबोधीपुत्रोक्षरे खल्विमे अविकर्ष
न्नेकीकुर्वन्यथावर्णमाह तद्या सा मात्रा पूर्वरूपोत्तररूपे अंतरे
ण संधिं विज्ञापनी साम तद्भवति सामैवाहं संहितां मन्य इति तदप्ये
तदृषिणोक्तं बृहस्पते न परः साम्नो विदुरिति स य एवमेतां संहि

Indira Gandhi National Centre for the Arts

आरण० तांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्व
॥५१॥ मायुरेति॥५॥५३॥बृहद्रथंतरयोरूपेणसंहितासंधीयतइतिताण्ड्यो
वाग्वैरथंतरस्यरूपंप्राणोबृहतउभाभ्यामुखलुसंहितासंधीयतेवा
चाचप्राणेनचैतस्यांहस्मोपनिषदिसंवत्सरंगारक्षयतिताण्ड्यं
तस्यांहस्ममात्रायांसंवत्सरंगारक्षयतेताण्ड्यस्तदप्येतदृषिणोक्तं
रथंतरमाजभाराववसिष्ठः।भरद्वाजोबृहदाचक्रेअग्नेरितिसयएवमे
तांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेण ॥५२॥

५१

लोकेनसर्वमायुरेतिवाक्प्राणेनसंहितेतिकौण्ठरव्यःप्राणःपवमा
नेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेनस्वर्गोलोकोब्रह्मणा
सैषावरपरासंहितासयोहैतामवरपरांसंहितांवेदैवंहैवसप्रज
यापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसंधीयतेयथैषासं
हितासयदिपरेणवोपसृतःस्वेनवार्थेनाभिव्याहरेदभिव्याहार्षन्ने
वविद्याद्दिवंसंहितागमंद्विदुषांदेवानामेवंभविष्यतीतिशश्वत्तथा
स्यात्सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्म

Indira Gandhi National Centre for the Arts

॥आरण्य॥
॥५२॥

वर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्संहितेति पंचालचंडो वा
चा वै वेदाः संधीयंते वाचा छंदांसि वाचा मित्राणि संदधति वाचा सर्वा
णि भूतान्यथो वागेवेदं सर्वमिति तद्यत्रैतदधीते वा भाषते वा वाचि त
दा प्राणो भवति वाक्तदा प्राणं रेळ्ह्यथ यत्र तूष्णीं वा भवति स्वपिति वा
प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेळ्हि तावन्योन्यं रीळ्हो
वाग्वै माता प्राणः पुत्रस्तदप्येतदृषिणोक्तमेकः सुपर्णः स समुद्रमावि
वेश स इदं विश्वं भुवनं विचष्टे तं पाकेन मनसापश्यमंतितस्तं माता रे ॥५२॥

ळ्हि स उ रेळ्हि मातरमिति स य एवमेतां संहितां वेद संधीयते प्रजया प
शुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथातः प्रजा
पतिसंहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः संधिः प्रजननं संधा
नं सैषादितिः संहितादितिर्हीदं सर्वं यदिदं किंच पिता च माता च पुत्र
श्च प्रजननं च तदप्येतदृषिणोक्तमदितिर्माता स पिता स पुत्र इति स य
एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन
स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति ॥६॥५४॥ इति तृतीयारण्य

Indira Gandhi National Centre for the Arts

॥आरण्०॥
॥५३॥

केप्रथमोध्यायः॥राम॥ॐ॥म॥प्राणोवंशइतिस्थविरःशाकल्यस्त
द्यथाशालावंशेसर्वेन्येवंशाःसमाहितास्युरेवमस्मिन्प्राणेचक्षुःश्रो
त्रंमनोवागिंद्रियाणिशरीरंसर्वआत्मासमाहितस्तस्यैतस्यात्मनः
प्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानःस्वररूपंमांसंलोहितमि
त्येतदन्यच्चतुर्थमतःस्थारूपमितिहस्माहह्रस्वोमांडूकेयस्त्रयंले
वनएतस्मोक्तंतस्यैतस्यत्रयस्यास्थूंमज्ज्ञापर्वणामितित्रीणीतःष
ष्टिशतानित्रीणीतस्तानिसप्तविंशतिशतानिभवंतिसप्तचवेशता ॥५३॥

निविंशतिश्चसंवत्सरस्याहोरात्रास्तएषोहःसंमानश्चक्षुर्मयः
श्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतम
हःसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानं
वेदाह्नंसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भव
तिसर्वमायुरेति॥१॥७॥५५॥अथकोंठरव्यस्त्रीणिषष्टिशता
न्यक्षराणांत्रीणिषष्टिशतान्यूष्मणांत्रीणिषष्टिशतानिसंधीनां
यान्यक्षराण्यवोचामाहानितानियान्यूष्मणोवोचामरात्रयस्ताया

Indira Gandhi National Centre for the Arts

॥आरण०॥ ॥५४॥

त्संधीनवोचामाहोरात्राणीतिसंधयइत्यधिदैवतमथाध्यात्मंयान्य
क्षराण्यधिदैवतमवोचामास्थीनितान्यध्यात्मंयानूष्माणोधिदैवत
मवोचाममज्जानस्तेध्यात्ममेषहवैसंप्रतिप्राणोयन्मज्जैतद्रेतोन
हवाऋतेप्राणाद्रेतःसिच्यतेयद्वाऋतेप्राणाद्रेतःसिच्येतपूयेनसंभ
वेद्यौन्संधीनधिदैवतमवोचामपर्वाणितान्यध्यात्मंतस्यैतस्यात्र
यस्यात्मनःस्थूलंमज्ज्ञांपर्वणामितिपंचैतश्चत्वारिंशच्छतानिपंचैतस्तद
शीतिसहस्रमभवंस्यशीतिसहस्रंवाअर्कलिनोबृहतीरहरभिसंपा ॥५४॥

दयंतिसएषोक्षरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयो
वाङ्मयआत्मासयएवमेतमक्षरसंमानंचक्षुर्मयंश्रोत्रमयंछं
दोमयंमनोमयंवाङ्मयमात्मानंवेदाक्षराणांसायुज्यंसरूप
तांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति॥२॥८॥
५६॥चत्वारःपुरुषाइतिबाध्वःशारीरपुरुषश्छंदःपुरुषोवेदपुरु
षोमहापुरुषइतिशारीरपुरुषइतियमवोचामसयएवायंदै
हिकआत्मातस्ययोयमशरीरःप्रज्ञात्मासरसश्छंदःपुरुष

Indira Gandhi National Centre for the Arts

॥आरण्य॰॥
॥५५॥

इतियमवोचामाक्षरसमाम्नायएवंतस्यैतस्याकारोरसःसौवेदपुरुष
इतियमवोचामयेनवेदान्वेदऋग्वेदंयजुर्वेदंसामवेदंतस्यैतस्यब्र
ह्मारसस्तस्माद्ब्रह्माणंब्रह्मिष्ठंकुर्वीतयोयज्ञस्योल्बणंपश्येन्महा
पुरुषइतियमवोचामसंवत्सरएवप्रध्वंसयन्नन्यानिभूतान्येका
भावयन्नन्यानितस्यैतस्यासावादित्योरसःसयश्चायमशारीरः
प्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तस्मात्पुरुषंप्रत्या पुरुषं२
दित्योभवतितदप्येतदृषिणोक्तंचित्रंदेवानामुदगादनीकंचक्षु ॥५५॥

र्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माज
गतस्तस्थुषश्चेत्येतामनुविधंसंहितांसंधीयमानांमन्यइतिहस्मा
हबाध्वएतंह्येवबह्वृचामहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतं
महाव्रतेछंदोगाएतमस्यामेतंदिव्येतंवायावेतमाकाशएतमप्स्वेतं
मोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वेतंसर्वेषुभूतेष्वेत
मेवब्रह्मेत्याचक्षतेसएषसंवत्सरसंमानश्चक्षुर्मयःश्रोत्रमयः
छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसंमा

Indira Gandhi National
Centre for the Arts

आरण्य० ॥५६॥

नं चक्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंस
ति ॥ ३ ॥ ९ ॥ ५ ७ ॥ दुग्ध दोहा अस्य वेदा भवंति न तस्यानूक्ते भागो स्ति
न वेद सुकृतस्य पंथानमिति तदप्येतदृषिणोक्तं यस्तित्याज सचिविदं
सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणोति न हि
प्रवेद सुकृतस्य पंथामिति न तस्यानूक्ते भागो स्ति न वेद सुकृतस्य पंथा
नमित्येतत्तदुक्तं भवति तस्मादेवं विद्वान्न परस्मा अग्निं चिनुयान्न प
रस्मै महाव्रतं न स्तुवीतं न परस्मा एतदहः शंसेत्कामं पित्रे वाचार्याय ॥५६॥

वा शंसेदात्मन एवास्य तत्कृतं भवति स यश्चायमशरीरः प्रज्ञात्मा
यश्चासावादित्य एकमेतदित्यवोचामेतौ यत्र विहीयेते चंद्रमा इ
वादित्यो दृश्यते न रश्मयः प्रादुर्भवंति लोहिनी द्यौर्भवति यथा मंजि
ष्ठा व्यस्तः पायुः काककुलायगंधिकमस्य शिरो वायति संपरेतो
स्यात्मा न चिरमिव जीविष्यतीति विद्यात्स यत्करणीयं मन्येत तत्कु
र्वीत यदंति यच्च दूरक इति सप्त जपेदादित्स्नस्य रेतस इत्येका
यत्र ब्रह्मा पवमानेति षट् उद्वयं तमसस्परीत्येका धा पियत्राछि

आरण्०
५७ द्रइ वादित्यो दृश्यते रथनाभिरिवाभिख्यायेत छिद्रां वा छायां पश्येत्त
दप्येवमेव विद्यादथाप्यादर्शे वोदके वा जिह्मशिरसं वाशिरसं वात्मा
नं पश्येद्विपर्यस्तं वा कन्यके जिह्मेन वा दृश्येयातां तदप्येवमेव विद्या
दथाप्यपिधायाक्षिणी उपेक्षेतत यथा बटरकाणि संपतंतीव दृश्यंते
तानि यदा न पश्येत्तदप्येवमेव विद्यादथाप्यपिधाय कर्णा उपश्रृणुया
त्स एषोग्निरिव प्रज्वलतो रथस्येवोपब्दिस्तं यदा न श्रृणुयात्तदप्येवमे
व विद्यादथापि यत्र नीलइवाग्निर्दृश्यते यथा मयूरग्रीवा मेघे वा ॥५७॥

विद्युतं पश्येन्मेघे वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत्तत्तद
प्येवमेव विद्यादथापि यत्र भूमिं ज्वलंतीमिव पश्येत्तत्तदप्येवमेव वि
द्यादिति प्रत्यक्षदर्शनात्यथ स्वप्नाः पुरुषं कृष्णं कृष्णदंतं पश्यति स
एनं हंति वराह एनं हंति मर्कट एनमास्कंदयत्याशु वायुरेनं प्रवहति
सुवर्णं खादित्वापगिरति मध्वश्नाति बिसानि भक्षयत्येकपुंडरीकं
धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली
दक्षिणामुखो व्राजयति स यद्येतेषां किंचित्पश्येदुपोष्य पाय

Indira Gandhi National Centre for the Arts

संस्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वान्येनान्नेन ब्राह्म
णान्भोजयित्वा चरुं स्वयं प्राश्नीयात्स यो तोश्रुतो गतो मतो नतो दृष्टो
विज्ञातो नादिष्टः श्रोता मंता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां
भूतानामंतरपुरुषः स म आत्मेति विद्यात् ॥४॥१०॥५८॥ अथ खल्वियं
सर्वस्यै वाच उपनिषत्सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषदमीत्येवाचक्ष ५६२
ते पृथिव्या रूपं स्पर्शा अंतरिक्षस्योष्माणो दिवः स्वरा अग्ने रूपं स्पर्शा
वायोरूष्माण आदित्यस्य स्वरा ऋग्वेदस्य रूपं स्पर्शा यजुर्वेदस्योष्मा



णः सामवेदस्य स्वराश्चक्षुषो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः
प्राणस्य रूपं स्पर्शा अपानस्योष्माणो व्यानस्य स्वरा अथ खल्वियं दै
वी वीणा भवति तदनुकृतिरसौ मानुषी वीणा भवति यथास्याः शिर ए
वममुष्याः शिरो यथास्या उदरमेवममुष्या अंभणं यथास्यै जिह्वैवम
मुष्यै वादनं यथास्यास्तंत्रय एवममुष्या अंगुलयो यथास्याः स्वरा ए
वममुष्याः स्वरा यथास्याः स्पर्शा एवममुष्याः स्पर्शा यथा ह्येवेयं शब्दव यंर
तीतर्द्म वत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन च

Indira Gandhi National
Centre for the Arts

आरण०
५८

र्मणापिहिताभवत्येवमसौलोमशेनचर्मणापिहितालोमशेनहस्म
वैचर्मणापुरावीणाअपिदधतिसयोहैतांदेवींवीणांवेदश्रुतवदनो
भवतिभूमिप्रास्यकीर्त्तिर्भवतियत्रक्कचार्यावाचोभाषंतेविदुरेनंतत्रा
थातोवाग्रसोयस्यांसंसद्यधीयानोवाभाषमाणोवानविरुरुचुषेतत
त्रैतामृचंजपेदोष्ठापिधानानकुलीदंतैःपरिवृतापविः।सर्वस्यैवाच
ईशानाचारुमामिहवादयेदितिवाग्रसः॥११॥५॥५॥अथहास्मा
एतत्कृष्णहारितोवाग्ब्राह्मणमिवोपोदाहरतिप्रजापतिःप्रजाः ॥५८॥

सृष्ट्वाव्यस्रंसतसंवत्सरःसछंदोभिरात्मानंसमदधाद्यछंदोभिरा
त्मानंसमदधात्तस्मात्संहितातस्यैवाएतस्यैसंहितायैणकारोबलं
षकारःप्राणआत्मासयोहैतौणकारषकारौवेनुसंहितमृचोवेद
सबलांसप्राणांसंहितांवेदायुष्यमितिविद्यात्सयदिविचिकित्से
त्सणकारंब्रवाणी३अणकारा३इतिसणकारमेवब्रूयात्सषका
रंब्रवाणी३अषकारा३इतिसषकारमेवब्रूयात्तेय इयमनुसंहि
तमृचोधीमहेयच्चमांडूके यीयमध्यायंप्रब्रूमस्तेननोणकार

॥आरण्य०॥
॥६०॥

षकारौ उपाप्ताविति ह स्माह ह्रस्वो मांडूकेयो ऽथ यद्ध्ययमनु संहितमृचो
धीमहे यच्च मांडूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारौ उपाप्ता
विति ह स्माह स्थविरः शाकल्य एतं ह स्म वै तद्विद्वांस आहुर् ऋषयः का
व षे याः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि
प्राणं जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययस्ता एताः संहिता ना
नंतेवासिने प्रब्रूयान्नासंवत्सरवासिने नाप्रवक्त्र इत्याचार्या आचार्याः
॥६॥१२॥६०॥ इति तृतीयारण्यके द्वितीयो ध्यायः॥ तृतीयारण्यं समाप्तं॥ ॥६०॥

ॐ म॥ विदा मघवन्विदा गातुमनुशंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां
पुरूवसो। आभिष्ट्वमभिष्टिभिः प्रचेतन प्रचेतय। इंद्र द्युम्नाय न इषं एवा हि श
क्रः। राये वाजाय वज्रिवः शविष्ठ वज्रिन्नृंजसे। मंहिष्ठ वज्रिन्नृंजस आया
हि पिब मत्स्व। विदा राये सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु। मंहिष्ठ व
ज्रिन्नृंजसे यः शविष्ठः शूराणां। यो मंहिष्ठो मघोनां चिकित्वो अभि नो नय
। इंद्रो विदे तमु स्तुषे वशी हि शक्रः। तमूतये हवामहे जेतारमपराजितं।
स नः पर्षदति द्विषः क्रतुश्छंद ऋतं बृहत्। इंद्रं धनस्य सातये हवाम

Indira Gandhi National Centre for the Arts

॥आरण्य॥ ॥६१॥ हं जेतारमपराजितं। स नः पर्षदति द्विषः स नः पर्षदति स्रिधः। पूर्वस्य यत्ते
अद्रिवः सुम्न आधेहि नो वसो। पूर्तिः शविष्ठ शस्यते ईशे हि शक्रः। नू तं त
न व्यं सन्यसे प्रभो जनस्य वृत्रहन्। समन्येषु ब्रवावहै शूरो यो गोषु गच्छ
ति सखा सुशेवो अद्वयाः। एवा ह्येवेवा ह्यग्ने ३ ऊं। एवाह्येवेवा हीं द्रं॥
एवाह्येवेवा हि विष्णो ऊं। एवाह्येवेवा हि पूष न्। एवाह्येवेवा हि देवा ः॥
एवा हि शक्रो वशी हि शक्रो वशाँ अनु। आ यो मन्याय मन्यवे उपो मन्याय
मन्यवे उपेहि विश्वधा। विद्मा मघवन्निद्धि भूः॥ १॥ ६१॥ इति चतुर्थारण्य ॥६१॥

के प्रथमोध्यायः॥ चतुर्थारण्यः समाप्तः॥ राम ॐ महाव्रतस्य पंच
विंशतिं सामिधेन्यं एकविंशतौ प्रागुपोत्तमायाः समिधाग्निमिति चेत
स्रो विश्वकर्मण ऋषभमु पालंभनीयं उपांश्वाज्य प्रयुगे विश्वजितो हो
त्रांश्चतुर्विंशादीस्वयं तीरपस्युव इति च ब्राह्मणाछंस्यावपेत प्रातः
सवने तीव्रस्याभिवयसो अस्य पाहीति माध्यंदिने त्रिकद्रुकेषु महि
षो यवाशिरमिति स्तोत्रियं ऐंद्रे याह्युपनः परावत इंद्राय हि द्यौरसुरो
अनम्नत। प्रोष्वस्मै पुरोरथमित्यतानुरूपश्चतुर्विंशान्मरुत्वतीय

Indira Gandhi National Centre for the Arts

आरण॰
॥६२॥

स्यातानौ सं त्सु मे जरितः साभिवेगः। पिबा सोमम भि न्द्र यमुग्र तर्दः कया
शुभा सवयसः सनीळाः मरुत्वाँ इंद्र वृषभो रणाय। जनिष्ठा उग्रः सह
से तुरायेति मरुत्वतीयं संस्थिते मरुत्वतीये होता विसंस्थित संचरेण
निष्क्रम्याग्नीध्रीये तिस्र आज्याहुतीर्जुहोत्यौदुंबरेण स्रुवेणानु मामिं
द्रो अवतु मा बृहस्पतिरनु सोमो अनु वाग्देव्यावीत्। अनु मा मित्रावरुणा
विहावतामनु द्यावापृथिवी पूर्वहूतौ। आदित्या मा विश्वे अवंतु देवाः स
प्त राजानो य उदाभिषिक्ताः। वायुः पूषा वरुणः सोमो अग्निः सूर्यो नि ॥६२॥

क्षत्रे रवतु विहमानु। पितरो मा विश्वमिदं च भूतं पृश्निमातरो मरुतः स्व
र्काः। ये अग्निजिह्वा उत वा यजत्रा आस्ते नो देवाः सुहवाः शर्म यच्छंतेति द
क्षिणे मार्जालीये द्रव्यस्रुक्‌च्युतमां चतुर्गृहीतं पूर्वमवधायोत्तरतोग्ने
रुपनिधाय विहरणप्रभृति मध्यंदिने मार्जालीयो र्जगदिति प्रवर्ति
तस्मिन्परिवृते जुहोति प्राग्द्वारे वोदग्द्वारे वा प्रागुदग्द्वारे वाग्निरिवा
नाधृष्यः पृथिवीव सुषदा भूयासमंतरिक्षमिवानाधृष्यो द्यौरिवाना
धृष्यो भूयासं सूर्य इवाप्रतिधृष्यश्चंद्रमा इव पुनर्भूर्भूयासं मन

Indira Gandhi National
Centre for the Arts

॥आरण्य॥
॥६३॥

इवाहं वैवायुरिवश्लोकभूर्भूयासं मे हरिवस्वरात्रिरिवप्रियोभूयासं
गा वइवपुनर्नुर्वौमिथुनमिवमरीचयो भूयासं मापइवरसं ओषधय
इवस्वरूपं भूयासं मन्त्रमिवविर्नुायज्ञइवप्रभूर्भूयासं ब्रह्मेवलोके क्ष
त्रमिवश्रियांभूयासंयदग्नएषासमितिर्भवातीत्यत्रविमज्जाथवीधे
तित्रीएयनन्तरमत्रतिष्ठन्नादित्यमुपतिष्ठतेपर्यावर्तेप्रदक्षिणमा
वृत्येतेश्चेवांस्वाहाकारेरेद्धोवांइदंमधूइदंमधुइमंतीव्रसुतंपि
बांइदंमधूइदंमध्वितिचैप्रेष्याः संज्ञास्तिरत्नीकुंभास्तिस्त्रोवमाः ॥६३॥

षकुम्भौ इमं धिष्ण्यमुदकुम्भं चैत्रिः प्रदक्षिणं परिव्रज्याथदक्षिणेः पा
णिभिर्दक्षिणान्नूरूनाघ्नानाएद्धोवांइदंमधूइदंम ध्वितिवदन्त्यः ॥१
६२॥ उपाकृतेस्तोत्रेत्रेधंनिनयाथात्रोत्तरेचमार्जालीयेशेषमंतुर्वेदी
तिंप्रदक्षिणमग्निंनिष्क्रम्याग्रेणयूपंपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्नग्नेः
शिरउपतिष्ठतेनमस्तेगायत्रायवेशिरइतितेनैवयथेतंप्रत्ये
त्यदक्षिणमुदङ्मुखःपक्षंनमस्तेराथंतरायवस्तेदक्षिणःपक्ष
इत्यपरेणाग्निपुच्छमतिक्रम्यप्राङ्मुखउत्तरंनमस्तेबृहतेयस्त

Indira Gandhi National Centre for the Arts

आरण०
॥६४॥

उत्तरः पक्ष इति पश्चात्प्राङ् पुच्छन्नमस्ते भद्राय यत्ने पुच्छं याते प्रतिष्ठे
ति दक्षिणतः पुच्छस्यात्मानं नमस्ते शतनाय यस्त आत्मेति ॥ २ ॥ ६३ ॥ य
थेतं सदः प्रसर्पति पुरस्तात्प्रे खवुपक्लृप्तो भवति स्थूणे रज्जू वीवधं
इत्येतत्प्रक्षाल्यं तीर्थेन प्रपाद्यो त्तरेणाग्नीध्रीयं परिव्रज्य पूर्वया द्वारा
सदः सर्वान्धिष्ण्याननुत्तरेणौदुंबराणि काष्ठानि प्रेंखस्य भवति पालाशा
नि मिश्राणि वा त्रीणि फलकान्युभयतस्तष्टानि द्वे वा सूच्यश्चैतावत्य
इषुमात्राः प्राङ् प्रेंखो निमुष्टिकं स्तिर्यङ्कुदगग्रः प्रागग्राभ्यां सूचीभ्यां ॥६४॥

समुतो दक्षिणोत्तरे स्थूणे निखायाभितो होत्रसदनं वीवधमत्यादधी
त्यास्य संमितं कर्त्तुः कुष्ठासु छिद्राणि प्रेंखस्य भवंति रज्जूभ्यामूर्ध्व
मुद्वयति दक्षिणतो दक्षिणयोत्तरतः सव्यया दाम्यैत्रिगुणस्यान्तौ स
व्यदक्षिणे पंचव्यायामे द्विगुणे वीवधे त्रिः प्रदक्षिणं पर्यस्योर्ध्वं ग्रथि
निष्ठकं विध्याति शाखाभिर्दृसीभिर्वा पर्य्यृषं स्यप्रकंपि चतुरंगुलेने षवि
वीर भूमः प्रेंखस्यान्मुष्टिमात्रेण दक्षिणत उदाहित तरः समो वा पदमात्रे
धिष्ण्यात् ॥ ३ ॥ ६४ ॥ निष्ठिते प्रेंखे होता वाणमौदुंबरं शततंतुमुभाभ्यां

Indira Gandhi National Centre for the Arts

॥आरण०॥
॥६५

परिगृह्योत्तरतउपोहतैयथावीणांसमानिश्छंदोभिर्ध्रुवतुरुत्तरेस्था
नान्यस्याधर्व मुञ्जहणीयाद्दृशाभिर्वागायत्रेणत्वाछंदसारोहामीत्यौ
ष्णिहेनत्वानुष्टुभेनत्वाबार्हतेनत्वापांक्तेनत्वात्रैष्टुभेनत्वाजागतेन
त्वावैराजेनत्वाद्विपदेनत्वेतिछंदसात्वेतिछंदांस्यनुक्रम्यस्थानानां
मनुपरिक्रमणंमौदुंबर्याईयाशाखयासपलाशयामूलदेशेन
वाणांत्रिरूर्ध्वमुल्लिखतिप्राणायत्वापानायत्वाव्यानायत्वोल्लिखा
मीत्यन्येभ्योपिकामेभ्यःपुनरपिनत्तूल्लिखामीतिब्रूयादथैनंस ॥६५॥

शाखंछंदोभ्यःप्रयच्छतिमनेभ्यस्त्वेतिपश्चार्धेफलकंपाणीप्रतिष्ठा
पयतिप्राणमनुप्रेखस्वेतिप्राचंखेप्रेप्रणयतिव्यानमनुवीखस्वेतिति
र्यंचमपानमन्वीखस्वेत्यन्यात्संभूर्भुवःस्वरितिजपतिप्राणयत्वेतिप्रां
चमेवंव्यानायत्वेतितिर्यंचमपानायत्वेत्यन्यात्संवसवस्त्वागायत्रे
णछंदसारोहंतुतानन्वारोहामीतिपश्चार्धेफलकेस्थलीप्रतिष्ठापयत्यथ
पूर्वफलकंनानापाणिभ्यामभिपद्यतेयथाहिस्तफ्यन्मध्यमंक्षुबु
केनोपस्पृश्येद्वयोवीसाधिंरुद्रास्त्वात्रैष्टुभेनछंदसारोहंतुतानन्वा

Indira Gandhi National Centre for the Arts

आरण्य ॥ ६६ ॥

रोहामीति दक्षिणं सक्थ्यति हरं त्यादित्यास्त्वा जागतेन छंदसारोहंतु ता
न्वारोहामीति सव्यं विश्वे त्वा देवा आनुष्टुभेन छंदसारोहंतु तानन्वारो
हामीति समारोहति पश्चात्स्वस्य धिष्ण्यस्य दक्षिणं पादं प्राञ्चं प्रतिष्ठापयं
त्यथ सव्यं यदेतरश्चाम्यं देथे तरं यदेतरो थेतरं नोज्ञो विभूमो कुर्यात्कूर्चान्हो
त्रकाः समारोहंति ब्रह्मा चोदुंबरी मासंदी मुक्ता तां यदि कस्मैचिद् द्रव्यस्य के
मिलोंजिगमिषेदादि ऋय पालं प्राङ् वरूद्धं चरित्वा तमर्थमेवमेवाजपया
ता ९ वृतारोहेत् ॥ ४ ॥ ६५ ॥ प्रस्तोरं संज्ञास्ति पंचविंशस्य स्तोमस्यं ति स्त्रष्ठ धे ॥ ६६ ॥

श्रीगणेशाय नमः

तृतीयां स्वर्ध त्रयोदशासु वा परिशिष्टासु प्रथमं प्रतिहारं प्रब्रूता दिस्यई
त्रयोदशासु प्रवाचयतेति तात्रकर्ण्यः प्रोक्ते जपति सुपर्णोसि गरुत्मा
न्प्रिमां वाचं वदिष्यामि बहु वदिष्यंती बहु पतिष्यंती बहु करिष्यंती बहु
सनिष्यंती बहोर्भूयः करिष्यंती स्वर्गच्छंती स्वर्वदिष्यंती स्वः पतिष्यंती स्वः क
रिष्यंती स्वः सनिष्यंती स्वरिमं यज्ञं वक्ष्यंती स्वर्मां यजमानं वक्ष्यंतीमिति
दीक्षितेषु यजमानशब्दो नादीक्षिते स्वरमुमिति योस्य प्रियः स्यात्तं नु वक्ष्यं
तीमिति ब्रूयादुक्थवीर्याणि च संप्राणो वा च्वा समहं वाचा संचक्षुर्मन

Indira Gandhi National Centre for the Arts

॥आरण०॥
॥६७॥

सासमहं मनसासं श्रोत्रमात्म नासमहमात्म नोमयिमहान्मयिभर्गो:
मयिभर्गोमयिभुजोंमयिस्तोभोमयिस्तोमोमयिश्लोकोमयिघोषोम
यियशोमयिश्रीर्मयिकीर्तिर्मयिभुक्तिरित्याहुर्यथाग्निजपतित्रय
आहावा:शस्त्रादेर्निविद:परिधानीयायाइतिशाङ्खानध्वर्यून्न:कारयं
स्येतस्मिन्नहनिप्रभूतमन्नंदद्याद्व्रातपुत्रेणचर्मव्याधयंत्याघ्नंतिभू
३ मिदुंदुभिंपुंस्त्यश्चकांडवीणांभूतानांचमैथुनंब्रह्मचारिपुंश्चल्यो:सं
प्रवादोनैकेनसाम्नानिष्केवल्यायस्तुवतेराजनसौत्रियेणप्रतिपद्य ॥६७॥

ते॥५॥६६॥तदिदासमुवनेषुज्येष्ठंतासुतेकीर्तिंमघवन्महित्वाभूयइद्वा
वृधेवीर्यायनृणामुत्वान्तमंगीर्भिस्क्थेरितितिस्त्रोतृचेकेस्वादो:स्वा
दीय:स्वादुनास्रजासमद:सुमधुमधुनाभियोधीरित्यात्मनएतेपदेउ
डत्यपक्षपदेप्रत्यवदधात्यश्वायंतोमघवन्निंद्रवाजिनोगामश्वरथ्यमिं
द्रसंकिरैत्येतयोश्वस्थानइतरेश्रियमद्रगोरश्चमात्मंधत्तेसपक्षयो:प
तनायनदेवओदतीनामित्येतयेतानिव्यतिषजतिपादै:पादान्वृहती
कारनदेवसुत्तराणिप्रथमायाचपुरुषाक्षराण्युपदधातिपादेषकेक

Indira Gandhi National Centre for the Arts

॥आरण्य०॥
॥६८॥ मवसाने तृतीयवर्जं सखलु विहरत्यपि निदर्शनाय योहाह रिष्याम॥ तद्दिदो
समुर्वनेषु ज्येष्ठं पुनर्दव ओदंती नौयतो जज्ञ ऽ ग्रस्त्वेषन्नम्णो रुः॥ नदंयो
युवती नौ३म॥ सद्यो जज्ञानो निरिंलात्रिशत्रूम्पतिं वो अ घ्यानां॥ अनुयंवि
श्वम दंत्समाः षोधेनूनामिषुध्यसो ३मित्येवमेतास्त्रिरन्यासु चेत्समाम्नाता
सुराजनेन साम्नाक्ककवीरन्यथा स्थानं ताइहैवे मा असमाम्नाता सुचेत्कु
वीरत्समाम्नातस्य तावती रुकृत्यतत्रताः त्रांसैदिहो एवेमा अन्या सुचे
त्माक्स्तद्दोह संस्तास्तदिदा सेत्येतदादित्रास्त्रे मविहृतश्चात्र ॥६८॥

प्रतिगरंस्ता अस्य स्तद्दोहस इत्येतदादिः स्तद्दोहाः स्तद्दोहाः॥६॥६७॥
इति पंचमारण्यके प्रथमोध्यायः॥ राम॥ ओम्॥ ग्रीवा३॥ यस्येदमारजस्त
जो युजो वनं सहः॥ इंद्रस्यरंत्यं बृहत्॥ नाधृष आदधर्षं दाधृषाणं धृषितं शवः॥ पुरा यदीमतिव्यथिरिंद्रस्य धृषितं सहः॥ स नो ददातु रयिं रयिं पिशं गसंदृशं॥ इंद्रः पतिस्तुविष्टमो जनेष्वा स्तद्दोहाः॥ त्रिरोगायत्रं मिंद्रमि
ज्राथिनो बृहदित्यन्यासु चेत्समाम्नाता सु स्त्कवीरन्नुनयासं स्थानविप
र्ययौ समाम्नातासु चेत्तत्कवीरन्मिश्रासु चेत्स्तक स्योत्तमां स्तद्दोहा तं४

Indira Gandhi National Centre for the Arts

॥आरण०॥
॥६९॥

विजवैः। सुतस्ते सोम उपयाहि यज्ञं मत्स्वा मदं पुरुवारं मघायै। मंहिष्ठ
इंद्र विजुरो गृणाध्यै। ससाहंतुईत्रहत्येषु शात्रून्मुर्विगाहएषैः। सनोनेता
रंमहयोमइंद्रं। इनोवसुसमृजः पर्वतेष्ठाः प्रतिवाम्रजीषी। इंद्रः शाश्वद्द्विजो
हृत्रुएवैः। स्वदद्दोहा इत्येतत्र यंश्रीवाः शिरोविजवः सर्वमईर्च्यै ७ १ ६८
राथंतरो दक्षिणः पक्षो ज्ञित्वां भूरनो नुमोभि त्वा पूर्वपीतय इति रथंतरस्य
स्तोत्रियानुरूपौ प्रगाथो च तस्त्रः सतीः षड्बृहतीः करोतींद्रस्य नु वीर्याणि
प्रवोचं त्विहयत्पितरश्चिन्न इंद्रेति पंचदशायस्तिग्मश्रृंगो वृषभो नभी ॥६९॥

मंतु ग्रो जज्ञे वीर्याय स्वधावानुदुब्रह्मा एयरतश्चवुस्यानं महइंद्रो यु ये इति
पंचसूक्तान्यानइंद्रो दूरादान आसादिति संपातं इत्थाहि सोमइन्मदइति
पंक्तिः स्वदद्दोहा बार्हत उत्तरस्त्वामिद्धि हवामहे त्वं ह्यो हि चेरव इति बृहतः
स्तोत्रियानुरूपौ प्रगाथो च तस्त्रः सतीः षट् बृहतीः करोतीति तमु ष्टुहियो
अभिभूत्योजाः सुत इत्त्व न्निमिश्ल इंद्र सोम इति त्रीण्येवं भूरेको रयिपते
रयीणामित्येषा सूक्तानि कथा महामवृधत्कस्य होतुरिति संपातं इंद्रा
मदाय वावृध इति पंक्तिः स्वदद्दोहा राथंतरो दक्षिणः पक्षः पंचदशस्तोमं

Indira Gandhi National Centre for the Arts

॥आरण्य०॥
॥७०॥

एकरात्रं वसिष्ठप्रासाहो बार्हतउत्तरः सप्तदशस्तोमौ द्विरात्रं भरद्वाजप्रा
साहोभ्रद्रे पुरुं द्विपदा स्त्रिमानुकं भुवनासीषधामायाहिवनसासहेतिनव
समाम्नाता अथासमाम्नाताः प्रवइंद्राय वृत्रहंतमाय विप्रागाथंगाय
तयज्जु जोषत अर्चत्यर्कं देवताः स्वर्की आस्तोमतिश्रुतो युवासइंद्रः
उपप्रक्षे मधुमतिक्षियंतः पुष्यंतोरयिंधीमहे तमिंद्रं विश्वतोदावन्विश्व
तो आभर यंत्वा शविष्ठमीमहे सस्नुपर्णीतेन्द्र तमस्वराळ् सिमं हिष्ठावा
जसातये त्वंह्येकुईशिषे सुनादस्मेक्रु ओजसा विश्वेस्य प्रस्तोभ विद्धा ॥७०॥

न्पुरा वायदिवेहासनूनं इषं नो मित्रावरुणाकर्तनेळां पीवरीमिषं कृणु
हीनइंद्राग्नी पदं मघं रयिषं णिनसोमो अव्रतं हिनोतिनस्पृशाद्रयिः॥ एष
ब्रह्मेतितिस्र आधूर्षस्मा इत्येका सूददोहा यदद्यावानेतिधाय्यासूददोहाः
॥८॥६९॥ गायत्री त्वचा शीतिर्महां इंद्राय ओजसे नितिस्र उत्तमा उद्धरति
पुरोळाशं नो अंधसइतितिस्र इंद्र इत्सोमपा एक इत्येतत्प्रभृतीनीति
स्र उत्तमा उद्धरति तासां स्वादवः सोमा आयाहीत्येतामुद्धृत्य येन ह्यन्यं
बल्बाकरमित्येतां प्रत्यवदधाति जज्ञानो नु शतक्रतुरित्येका पुरुहूतं पु

Indira Gandhi National Centre for the Arts

॥आरण्०॥
॥७१॥

रुष्टतमितित्रो षैंउद्धेदमिक्षतामघमित्युत्तमामुद्धरतिंप्रकृतान्यैजीषि
णाआघायेअग्निमिंधतेंआतूनइंद्रक्षुमंतमितिसूक्तेसूदटोहीः॥९॥
१०॥बार्हतीतृचाशीतिर्मोचिदन्यद्विशंसतेत्येकयानत्रिंशीत्सिबासुनस्पर
सिनइतिविंशतिःसप्तमीचाष्टमीचोद्धरतियदिंद्रप्रागपागुदगितिचतुर्द
शेवयंघत्वासुतावंतइतिपंचदशीमोषुत्वावाघतश्चनेत्येतस्यद्विपदांचो
द्धरतिराधंतरंचप्रगाथमथहास्यनकिःसुदासोरथमित्येतंप्रगाथमु
दृत्यत्वामिदाह्योनरईत्येतंप्रगाथंप्रस्थवदधौत्यभिप्रवःसुराधसमिति ॥७१॥

६ला
षड्वालखिल्यानांसूक्तानियःसत्राहाविचर्षणिरितित्रोषोयंते अस्तह
यीतइतिसूक्तेंउन्नयंश्चएवस्वनइतिसप्तमीचाष्टमीचोद्धरति तरोभिर्वो
विदद्वसुमित्युत्तमामुद्धरतियोराजाचर्षणीनामित्येकादशींतंवोदस्ममृ
तीषहमानोविश्वासुहव्यायाइंद्रभुजआभरइतिनवसूदटोहीः॥२०॥७१
॥ओमिहीत्वाशीतियइंद्रसोमपातमइतिसूक्तेंतम्वभिप्रगायतेत्युत्त
मामुद्धरतींद्रायसामगायतासखायआशिषामहीतितिस्रउत्तमाउद्धर
तियएकइद्विदयतेआयाह्यद्रिभिःसुतंयस्यत्यच्छंबरंमदइतित्रयस्तृचा

Indira Gandhi National Centre for the Arts

गायत्र्यः संपद्योक्तिर्हैः सप्तसप्तगायत्र्यः षट्‌षष्ठिर्होत्रवंति यदिंद्राहं
यथात्वं प्रसम्राजं चर्षणीनामिति सूक्ते उत्तरस्यात्रेमेउद्धरति वार्त्रह
त्याय न्नावस इत्युत्तमामुद्धरति सुरूपकृत्नुमूतय इति त्रीण्येंद्र सानसिं
रयिमिति सूक्ते य आनयत्परावत इति तिस्र उत्तमाउद्धरति रेवतीर्नः स
धमाद इति तिस्रः सूददोहा इत्येतास्तिस्रस्त्वचाशीतयः सर्वा अर्ध
र्चा अन्नमशीतयं उदरं वज्रास्त्वावतः पुरूवसविति वज्राः सनितः सुस
नितरित्येतदंतौ दंदीरेक्या इति द्विपदा नूनमथेत्येकपदा ता अस्य सूद ७२

६१ दोहसं त्येतदंतः सूददोहाः सूददोहाः॥ ११ ॥ ७२ ॥ इति पंचमारण्यके द्विती
योध्यायः॥ राम॥ ओं म॥ ऊरूऔं इंद्राग्नी युवं सुन इत्येतस्यार्धर्चा गायत्रीका
रमुत्तरमुत्तरस्यानुष्टुप्कारं प्रागुत्तमायाः प्रवामहे मंदमानायांधस इति
नि विज्ञानं वनेन वायो न्यंधायि चाकन्योज्ञान एव प्रथमो मनस्वानिति ने अं
तरेणायां द्युर्वाडुपवंधुरेष्ठां विधुं दद्राणं समने बहूनामित्येतदावपनं द
न्नातीनामैंद्रीणां त्रिष्टुप्जगतीनां बृहतीसंपन्नानां यावतीरावपेरंस्तावंत्यू
र्ध्वमायुषां वर्षाणि जिज्ञी विषेत् संवत्सरात्संवत्सरादन्नातो नवीत्यम्षुवा

Indira Gandhi National
Centre for the Arts

ऽग्निं देवज्ञं तमिंद्रो विश्वं विराजतीत्येकपदे ऽई विश्वा अवीवृधन्नित्यानुष्टु
भंतस्य प्रथमायाः पूर्वमर्द्धर्चं शस्त्वोत्तरेणार्धर्चेनोत्तरस्याः पूर्वमर्धर्चं व्य
तिषजति पादैः पादाननुष्टुप्कारं प्रागुत्तमायाः पूर्वस्मात्पूर्वस्मादर्द्धर्चादु
त्तरमुत्तरमर्द्धर्चं व्यतिषजति प्रकृत्या शेषः पिबा सोममिंद्र मंदतु त्वेति षं
ड्यानिष्ट इंद्रसदने अकारीत्येतस्य च तस्त्रः शस्त्वोत्तमामुपसंतत्योपोत्त
मया परिदधाति परिहित उक्थ उक्थं संपदं तत्पत्युक्थ वीर्यस्य स्थानउ
क्थदोहः ॥१२॥७३॥ मूर्द्धा लोकानामसि वाचो रसस्तेजः प्राणस्यायत ॥७३॥

नं मनसः संवेशश्चक्षुषः संभवः श्रोत्रस्य प्रतिष्ठा हृदयस्य सर्वा इंद्रः क
र्माक्षितममृतं व्योम ऋतं सत्यं विजिग्यानं विवाचनं मंतो वाचो विभुः सर्व
स्मादुत्तरं ज्योतिरूधः प्रतिवादः पूर्वः सर्वं वाक् पराग वाक्ति फ सलिलं धेनु
पिन्वति चक्षुः श्रोत्रं प्राणः सत्यं संमितं वाक् मनसा विभूतं हृदयोग्र
ब्राह्मणमतं सूमनश्चने। वर्षपवित्रं गोतनगोपृथिव्युपरं वरुणावृत्विमंतप्र
त्नविंद्रज्येष्ठं सहस्रधारमक्षुताक्षरममृतं दुहानं। एतास्त उक्थ भूत
य एता वाचो विभृतयः। ताभिर्म इह धुक्ष्वामृतस्य। श्रियं महीं। प्रजापतिरि

क

॥आश्व०॥
॥७४॥

देब्रह्मवेदानांसस्तेजोरसः।तेनाहंविश्वमाप्यासंसर्वान्कामांदुहांमह्यं।
भूर्भुवःस्वस्त्रयोवेदोसि।ब्रह्मप्रजांमेधुक्ष्व।आयुःप्राणंमेधुक्ष्व।पशून्वि
त्तंमेधुक्ष्व।श्रियंयशोमेधुक्ष्व।लोकंब्रह्मवर्चसमन्नाद्यंयज्ञसमृद्धंमेधु
क्ष्वेतिवाचयन्त्यध्वर्युमेवुद्धंचेदस्यभवत्यामुक्थ्यगायत्रसामस्येतीज्या
येसंप्रेषितोपियज्ञामहइत्यागूर्यनित्ययेवयजतिव्यवान्येवानुवषट्
करोत्युक्तंवषट्कारानुमंत्रणंमीहरत्यध्वर्युरुक्थ्यपात्रमतियाद्यांश्चम
सांश्चभक्षप्रतिख्यायहोताप्राङ्प्रेंखादवरोहत्यथैतंप्रेंखप्रत्यंचमव ॥७४॥

वध्नंतियथात्रासितारंभक्षयिष्यंतंनोपहनिष्यसीतिप्रेंखस्यछायतनेआ
सीनोहोताभक्षयेत्यथैतदुक्थ्यपात्रंहोतोपस्थेनजपेनभक्षयति।वा
ग्देवीसोमस्यतृप्यतु।सोमोमेराजायुःप्राणायवर्षतु।समेप्राणःसर्वमा
युर्दुहांमह्यंदृक्तमाराभिछविकौ तृतीयसवनमन्येदैश्वदेवान्निवि
द्धानांदस्यवामस्यपलितस्यहोतुरितिसलिलस्यदेर्घतमसंएकचत्वा
रिंशतंमानोभद्रीयंचतस्यस्थानेएकाह्निकोवैश्वदेवस्यप्रतिपदनु
चरौच्यवेतवेयज्ञायज्ञीयंमग्नेनवश्रवोवयइतिषट्स्तोत्रियानुरूपौ

२०१०८

॥आरण्य॥ ७५॥ यदी खांदं न्नूयसीषु चेत्तु वीरन्नोग्निन्नस्त्वक्लि निशिति नावतीरनुरूपः
संपन्नं महाव्रतं संतिष्ठत इदमहरग्निष्टोमौ यथाकालमवभृथं प्रेत्व हरे
युः संदहेयुर्वसीः ॥२॥१३॥७४॥ नादीक्षितो महाव्रतं शंसेन्नानग्नौ न पर
स्मै न संवत्सर इत्येके कामं पित्रे वाचार्याय वा शंसेदात्मने हैवास्य तच्छस्तं
भवति होतृत्रास्त्रिष्टुब्ध्य गायत्रं सोमस्येत्येकप्रैषः स नाराशंसेषु नाराशंसे
षु वा होत्रकाणामनुवध्य गायत्रं सोमानामिति तदिदमहर्नानं तेवासिने
प्रब्रूयान्नासंवत्सरवासिने नो एवासंवत्सरवासिने नाब्रह्मचारिणे ॥७५॥

नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानभिप्राप्तायेतं देशं न ब्रूयः
सकृज्जनाद्द्विर्गदनाद्वि दृय्येव एक एकस्मै प्रब्रूयादिति ह स्माह जातू
कर्ण्यो न वत्से च न तृतीय इति न तिष्ठंस्तिष्ठते न व्रजन्व्रजते न शयानः
शयानायनो पर्यासीनो यो ध एवासीनो ध आसीनार्य नावष्टब्धो न
र्द्धे५ प्रतिस्नब्धौ नातिवीतो नांकं कृत्वौ ह्यहुरनपश्रितो धीयीतं न मांसं
भुक्त्वा न लोहितं दृष्ट्वा न गतासुं न त्वा व्रतमाक्रम्य नाक्त्वा नाभ्यज्य नोन्म
र्दनं कारयित्वा न नापितेन कारयित्वा न स्नात्वा न वर्णकेनानुलिप्य न

उपर्यासीना ४

Indira Gandhi National Centre for the Arts

॥आर०ण०॥ ॥७६॥

स्नातमपिनहैनस्त्रियमुपगम्यैनोल्लिख्यनावलिख्यैनेदमेकस्मिन्न
हनिसमापयेदितिहस्माहजातूकर्ण्यः समापयेदितिगालवोयदन्य
त्राक्कृचाशीतिभ्यः समापयेदेवेत्याग्निवेश्यायनोऽन्यमन्यस्मिंदेशे
ऽमयमानदतियत्रेदमधीयीतनतत्रान्यदधीयीत यत्रत्वन्यदधी
यीतकाममिदंतत्राधीयीतनेदमनधीयन्स्नातकोभवतीयद्यप्यन्यद्ब
हुधीयान्नैवेदमनधीयत्स्नातकोभवतिनास्मादधीतात्प्रमाद्येद्यद्यप्य
न्यस्मात्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येदस्माच्चेन्नप्रमा ॥७६॥

आर० ॥७७॥

द्येद्दलमात्मनइतिविद्याद्दलंसत्यंविद्यान्नेदंविदन्निदंविद्वासमुद्दिशेन्नस
हभुंजीतनस्वधर्मादीस्यादथातःस्वाध्यायधर्मंव्याख्यास्यामउपपुराणेनापीते
कक्षोदकेपूर्वाह्णेसंभिन्नासुल्कायास्वेपरात्रेनाध्रुवेमेघेपतितेवर्षेत्रिरात्रं
वैदिकेनाध्यायनांतरियान्नास्मिन्कथांवदेतनास्यरात्रौचनचकीर्तयिषेन्नै
दितिवाएतस्यमहतोभूतस्यनामभवतियोस्यैतदेवंनामवेदब्रह्मभवतिब्रह्म
भवति॥३॥७५॥१४॥ इतिपंचमआरण्यकेतृतीयोध्यायः॥ॐ॥अग्निर्वैदेवः॥महाव्रत ॥७७॥

Indira Gandhi National Centre for the Arts

२०१०९

२०/३-७८

॥इतिपंचारण्यकानिसंपूर्णानि॥पशुपते॥